तत्तन्त्रजनितज्ञानचक्षुषा ऋषयोऽखिलाः । गुणान् द्रव्याणि कर्माणि दृष्ट्वा तद्विधिमाश्रिताः । आरोग्यं लेभिरे दीर्घमायुश्च सुखसंयुतम् । आयुर्वेदोक्तविधिनाऽन्येऽपि स्युर्मनयो यथा"।

अथ चरकप्रादुर्भावः "यदा मत्स्यावतारेण हरिणा वेद उद्धृतः । तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् । अथर्वान्तर्गतं सम्यगायुर्वेदं च लब्धवान् । एकदा स महीवृत्तं द्रष्टुं चर इवागतः । तत्र लोकान् गदैर्ग्रस्तान्व्यथया परिपीडितान् । द्रुमान् स्थलेषु पुष्पाढ्यान् म्रियमाणांश्च दृष्टवान् । तान् दृष्ट्वा तु दयायुक्तस्तेषां दुःखेन दुःखितः । अनन्तश्चिन्तयामास रोगोपशमकारणम् । संचिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह । यतश्चर इवायातो न ज्ञातः केनचिद्यतः । तस्माच्चरकनाम्नाऽसौ विख्यातः क्षितिमण्डले । स भाति चरकाचार्यो देवाचार्यो यथा दिवि । सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः । आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् । मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम् । तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता । चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः । अथ धन्वन्तरिप्रादुर्भावः । एकदा देवराजस्य दृष्टिर्निपतिता भुवि । तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः । तान् दृष्ट्वा हृदयं तस्य दयया परिपीडितम् । दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह । धन्वन्तरे ! सुरश्रेष्ठ ! भगवन् ! किञ्चिदुच्यते, । योग्योभवसि भूतानामुपकारपरोभव । उपकाराय लोकानां केन किं न कृतं पुरा । त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान् । तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपोभव । प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय । इत्युक्त्वा सुरशार्दूलः सर्वभूतहितेप्सया । समस्तमायुषोवेदं धन्वन्तरिमुपादिशत् । अधीत्य चायुषोवेदमिन्द्राद्धन्वन्तरिः पुरा । आगत्य पृथिवीं काश्यां जातोबाहुजवेश्मनि । नाम्ना ततोऽभवत् ख्यातोदिवोदास इति क्षितौ । बाल एव विरक्तोभूच्चचार च महत्तपः । यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम् । ततो धन्वन्तरिर्लोकैः काशीराजोऽभिधीयते । हिताय देहिनां स्वीया संहिता विहिताऽमुना । अयं विद्यार्थिनो लोकान् संहितां तामपाठयत्" । अथ सुश्रुतप्रादुर्भावः । अथ ज्ञानदृशा विश्वामित्रप्रभृतयोऽवदन् । अयं धन्वन्तरिः काश्यां काशीराजोय उच्यते । विश्वामित्रो मुनिस्तेषु पुत्रं सुश्रुतमुक्तवान् । वत्स ! वाराणसीं गच्छ विश्वेशवरवल्लभाम् । तत्र नाम्ना दिवोदासः काशीराजोऽस्ति बाहुजः । स हि धन्वन्तरिः साक्षादायुर्वेदविदांवरः । आयुर्वेदं ततोऽधीष्व लोकोपकृतिहेतवे । सर्वप्राणिदयातीर्थमुपकारोमहामखः । पितुर्वचनमाकर्ण्य सुश्रुतः काशिकाङ्गतः । तेन सार्द्धं समध्येतुं मुनिस्तनुशतं ययौ । अथ धन्वन्तरिं सर्वे वानप्रस्थाश्रमे स्थितम् । भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् । काशीराजं दिवोदासन्तेऽपश्यन् विनयान्विताः । स्वागतं च इति स्माह दिवोदासोयशोधनः । कुशलं परिपप्रच्छ तथाऽऽगमनकारणम् । ततस्ते सुश्रुतद्वारा कथयामासुरुत्तरम् । भगवन्मानवान्दृष्ट्वा व्याधिभिः परिपीडितान् । क्रन्दतोम्रियमाणांश्च जातास्माकं हृदि व्यथा । आमयानां शमोपायं विज्ञातुं वयमागताः । आयुर्वेदं भवानस्मानध्यापयितुमर्हति । अङ्गीकृत्य वचस्तेषां नृपतिस्तानुपादिशत् । व्याख्यातं तेन ते यत्नाज्जगृहुर्मुनयोमुदा । काशीराजं जयाशीर्भिरभिनन्द्य मुदान्विताः । सुश्रुताद्याः सुसिद्धार्था जग्मुर्गेहं स्वकं स्वकम् । प्रथमं सुश्रुतस्तेषु स्वतन्त्रं कृतवान् स्फुटम् । सुश्रुतस्य सखायोऽपि पृथक् तन्त्राणि तेनिरे । सुश्रुतेन कृतं तन्त्रं सुश्रुतं बहुभिर्यतः । तस्मात्तत् सुश्रुतं नाम्ना विख्यातं क्षितिमण्डले" चरके तु आयुर्वेदनिरुक्तिस्तत्प्रणेतृवंशोऽन्यथाभ्यधायि यथा "ब्रह्मणा हि यथा प्रोक्तमायुर्वेदं प्रजापतिः । जग्राह निखिलेनादावश्विनौ तु पुनस्ततः । अश्विभ्यां भगवान् शक्रः प्रतिपेदे ह केवलम् । ऋषिप्रोक्तोभरद्वाजस्तस्माच्छक्रमुपागमत्" ब्रह्मादिभारद्वाजान्तवंशमुक्त्वा ततो यथा भरद्वाजस्य प्राप्तिस्तदपि तत्रैवोक्तम् । यथा कतिचिन्मुनीनुपक्रम्य, 'ब्रह्मज्ञानस्य निधयोयमस्य नियमस्य च । तपसस्तेजसादीप्ताहूयमाना इवाग्नयः । सुखोपविष्टास्ते तत्र पुण्यां चक्रुः कथामिमाम् । धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् । रोगास्तस्यापहन्तारः श्रेयसोजीवितस्य च । प्रादुर्भूतोमनुष्याणामन्तरायोमहानयम् । कः स्यात्तेषां शमोपायइत्युक्त्वा ध्यानमास्थिताः । अथ ते शरणं शक्रं ददृशुर्ध्यानचक्षुषा । स वक्ष्यति शमोपायं यथावदमरप्रभुः । कः सहस्राक्षभवनं गच्छेत् प्रष्टुं शचीपतिम् । अहमर्थे नियुज्येयमत्रेति प्रथमं वचः । भरद्वाजोऽब्रवीत्तस्मादृषिभिः स नियोजितः । स शक्रभवनं गत्वा सुरर्षिगणमध्यगम् । ददर्श बलहन्तारं दीप्यमानमिवानलम् । सोऽभिगम्य जयाशीर्भिरभिनन्द्य सुरेश्वरम् । प्रोवाच भगवान्धीमान् ऋषीणां वाक्यमुत्तमम् । व्याधयोहि समुत्पन्नाः सर्वप्राणिभयङ्कराः । तद्ब्रूहि मे शमोपायं यथावदमरप्रभो ! ।